# हिमालयः

**प्रश्नः 1. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखत–**(निम्नलिखित प्रश्नों के उत्तर एक पद में लिखिए–)

(क) पृथिव्याः मानदण्डः कः?
(ख) हिमालयः भारतस्य कस्यां दिशि वर्तते?
(ग) इन्दोः किरणेषु कः निमज्जति?
(घ) कुमारसम्भवमहाकाव्यस्य रचयिता कः?
(ङ) हिमालयः गुहासु कं रक्षति?

**उत्तरम्–** (क) हिमालयः (ख) उत्तरस्याम् (ग) अङ्कः (घ) कालिदासः (ङ) अन्धकारम्।

**प्रश्नः 2. अधोरेखाङ्कितेभ्यः पदेभ्यः प्रश्ननिर्माणं कुरुत–**(नीचे रेखांकित पदों के आधार पर प्रश्नों का निर्माण कीजिए–)

(क) हिमालयः उत्तरस्यां दिशि वर्तते।
(ख) पृथिव्याः मानदण्डः हिमालयः अस्ति।
(ग) कुमारसम्भवमहाकाव्यं कालिदासेन विरचितम्।
(घ) अस्मिन् पाठे कविः हिमालयस्य वर्णनं करोति।

**उत्तरम्–** (क) हिमालयः **कस्याम्** दिशि वर्तते?
(ख) पृथिव्याः मानदण्डः **कः** अस्ति?
(ग) कुमारसम्भवमहाकाव्यं **केन** विरचितम्?
(घ) अस्मिन् पाठे कविः **कस्य** वर्णनं करोति?

**प्रश्नः 3. अधोलिखितेषु पदेषु सन्धिविच्छेदं कुरुत–**(निम्नलिखित पदों में संधि-विच्छेद कीजिए–)

अस्त्युत्तरस्याम् = .................... + ....................
नगाधिराजः = .................... + ....................
पूर्वापरौ = .................... + ....................
किरणेष्विव = .................... + ....................
यस्यातपवन्ति = .................... + ....................

**उत्तरम्–** अस्ति + उत्तरस्याम्। नग + अधिराजः। पूर्व + अपरौ। किरणेषु + इव। यस्य + आतपवन्ति।

**प्रश्नः 4. मञ्जूषातः शब्दान् चित्वा निर्दिष्टस्तम्भेषु लिखत–**(मञ्जूषा से शब्द चुनकर दिए गए स्तंभ के नीचे लिखिए–)

| | | | | |
|---|---|---|---|---|
| नगाधिराजः | दिशि | इन्दोः | सिद्धाः | करिभिः |
| किरणैः | द्रुमाणाम् | स्नुतक्षीरतया | क्षुद्रे | छायायाम् |
| गुहासु | महाकाव्ये | शृङ्गाणि | विघट्टितानाम् | मानदण्डः |
| प्रभवस्य | यः | घनानाम् | वृष्टिभिः | कालिदासेन |

| | **प्रथमा विभक्तिः** | **तृतीया विभक्तिः** | **षष्ठी विभक्तिः** | **सप्तमी विभक्तिः** |
|---|---|---|---|---|
| **यथा–** | यः | करिभिः | इन्दोः | गुहासु |
| | .................. | .................. | .................. | .................. |
| | .................. | .................. | .................. | .................. |
| | .................. | .................. | .................. | .................. |
| | .................. | .................. | .................. | .................. |

**उत्तरम्–**

| **प्रथमा विभक्तिः** | **तृतीया विभक्तिः** | **षष्ठी विभक्तिः** | **सप्तमी विभक्तिः** |
|---|---|---|---|
| नगाधिराजः | किरणैः | प्रभवस्य | दिशि |
| शृङ्गाणि | स्नुतक्षीरतया | द्रुमाणाम् | महाकाव्ये |
| सिद्धाः | वृष्टिभिः | घनानाम् | क्षुद्रे |
| मानदण्डः | कालिदासेन | विघट्टितानाम् | छायायाम् |

**प्रश्नः 5. अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत**–(निम्नलिखित पदों के आधार पर वाक्यों की रचना कीजिए–)

पृथिव्याः – ........................................................

हिमालये – ........................................................

गुहासु – ........................................................

इन्दोः – ........................................................

छायायाम् – ........................................................

**उत्तरम्– शब्दाः** **वाक्यानि**

| शब्दाः | वाक्यानि |
|---|---|
| पृथिव्याः | हिमालयः **पृथिव्याः** मानदण्डः इव अस्ति। |
| हिमालये | **हिमालये** ऋषयः अतपन्। |
| गुहासु | पुरा हिमालयस्य **गुहासु** ऋषयः अवसन्। |
| इन्दोः | **इन्दोः** किरणेषु शीतलता भवति। |
| छायायाम् | पथिकः वृक्षस्य **छायायाम्** विश्राम्यति। |

## अतिरिक्त-अभ्यासः

**(1) शब्दार्थान् मेलयत**–(शब्दार्थों का परस्पर मेल कीजिए–)

| | |
|---|---|
| नगाधिराजः | शिखराणि |
| तोयनिधी | मेघानाम् |
| इन्दोः | समुद्रौ |
| घनानाम् | अपहर्तुम्/दूरीकुर्तुम् |
| करिभिः | पर्वतराजः |
| सानूनि | चन्द्रस्य |
| विनेतुम् | गजैः |

**उत्तरम्–**

| | | |
|---|---|---|
| नगाधिराजः | = | पर्वतराजः |
| तोयनिधी | = | समुद्रौ |
| इन्दोः | = | चन्द्रस्य |
| घनानाम् | = | मेघानाम् |
| करिभिः | = | गजैः |
| सानूनि | = | शिखराणि |
| विनेतुम् | = | अपहर्तुम्/दूरीकर्तुम् |

**(2) सन्धिः विच्छेदः वा क्रियताम्**–(सन्धि अथवा सन्धिविच्छेद कीजिए–)

1. अस्त्युत्तरस्यां = ............. + .............
2. निमज्जति+इन्दोः = .............
3. किरणेष्विवाङ्कः = ............. + ............. + .............
4. यस्य+आतपवन्ति = .............
5. वृष्टिभिराश्रयन्ते = ............. + .............
6. क्षुद्रेऽपि = ............. + .............
7. पूर्वापरौ = ............. + .............

**उत्तरम्–** 1. अस्ति+उत्तरस्याम्, 2. निमज्जतीन्दोः, 3. किरणेषु+इव+अङ्कः, 4. यस्यातपवन्ति, 5. वृष्टिभिः+आश्रयन्ते, 6. क्षुद्रे+अपि, 7. पूर्व+अपरौ।

**(3) एकपदेन उत्तरत**–(एकपद में उत्तर दीजिए–)

1. कः अनन्तरत्नप्रभवः अस्ति?
2. किं हिमालयस्य सौन्दर्यं/वैभवं न नाशयति?
3. एकः हि दोषः कस्मिन् निमज्जति?
4. सिद्धाः काभिः उद्विग्नाः भूत्वा आतपयुक्तानि शिखराणि आश्रयन्ते?
5. हिमालयः अन्धकारं कुत्र/कासु रक्षति?

6. केषाम् गन्धः हिमलायस्य शृंगाणि सुरभीकरोति?

7. हिमालयः कस्याः मानदण्डः इव?

**उत्तरम्–** 1. हिमालयः, 2. हिमम्, 3. गुणसन्निपाते, 4. वृष्टिभिः, 5. गुहासु, 6. सरलद्रुमाणम्, 7.पृथिव्याः।

**(4) अधोदत्तानां पदानां लिङ्गं विभक्तिं वचनं च लिखत–**(निम्नलिखित पदों के विभक्ति, लिंग व वचन लिखिए–)

| | | | |
|---|---|---|---|
| 1. पृथिव्याः | लिंगम् | विभक्तिः | वचनम् |
| 2. इन्दोः | | | |
| 3. यस्य | | | |
| 4. वृष्टिभिः | | | |
| 5. शृङ्गणि | | | |
| 6. गुहासु | | | |
| 7. क्षुद्रे | | | |

**उत्तरम्–** 1. स्त्रीलिंगम्, षष्ठी, एकवचनम्।

2. पुंल्लिगम्, षष्ठी, एकवचनम्।

3. पुल्लिगम्, षष्ठी, एकवचनम्।

4. स्त्रीलिंगम्, तृतीया, बहुवचनम्।

5. नपुंसकलिंगम्, प्रथमा/द्वितीया, बहुवचनम्।

6. स्त्रीलिंगम्, सप्तमी, बहुवचनम्।

7. पुंल्लिगम्, सप्तमी, एकवचनम्।

**(5) मञ्जूषायाः सहायता श्लोकान्वयम् पूरयत।**(मञ्जूषा की सहायता से श्लोकों का अन्वय पूरा कीजिए–)

(क) ________ नाम नगाधिराजः ________ अस्ति। (असौ) पूर्वापरौ तोयनिधि वगाहय ________ मानदण्डः इव ________ दिशि स्थितः।

| पृथिव्याः, देवतात्मका, उत्तरस्यां, हिमालयः |
|---|

**उत्तरम्–** (क) हिमालयः, देवतात्मा, पृथिव्याः, उत्तरस्याम्।

(ख) एकः हि ________ गुणसन्निपातेः इन्दोः ________ अङ्कः इव ________।

| दोषः, किरणेषु, निमज्जति |
|---|

**उत्तरम्–** (ख) किरणेषु, दोषः, निमज्जति।

## बहुविकल्पीयप्रश्नाः

**(1) श्लोकस्य शुद्धं भावार्थं चिनुत–**(शुद्ध भावार्थ चुनिए–)

**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।**

1. हिमम् हिमालय–पर्वतस्य शोभां नाशयति।
2. हिमालये अनेकानि रत्नानि सन्ति, तैः च हिमालयस्य शोभा भवति।
3. हिमालयात् अनेकेषां रत्नानां उत्पत्तिः भवति। यद्यपि अयं पर्वतः हिमेन आच्छादितः तथापि अस्य शोभा न नश्यति।

**उत्तरम्–** हिमालयात् अनेकेषां रत्नानाम् उत्पत्तिः भवति। यद्यपि अयं पर्वतः हिमेन आच्छादितः तथापि अस्य शोभा न नश्यति।

**(2) अद्योलिखितं श्लोकांशं पठत प्रश्नान् च उत्तरत–**(श्लोकांश पढ़िए और प्रश्नों के उत्तर दीजिए–)

**दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिबान्धकारम्।**

**I. एकपदेन उत्तरत।**

1. कः रक्षति? ________ (दिवाकरः, हिमालयः)
2. अयं कम् रक्षति? ________ (दिवाभीतम्, अन्धकारं)

**II. एकवाक्येन उत्तरत–**

1. हिमालयः अन्धकारं कस्मात् रक्षति?
2. अन्धकारः कुत्र लीनः?

**III. यथानिर्देशम् रिक्तस्थानपूर्ति कुरुत।**

1. ____________ (एकवचनम्) ____________ (द्विवचनम्) गुहासु।
2. दिवाभीतमिव = ____________ (दिवा+भीतमिव, दिवाभीतम्+इव, दिवाभीतम्+एव)
3. पर्यायं चित्वा लिखत। सूर्यः = ____________ (दिवाकरात्, दिवाकर: दिवाकरम्)
4. अन्धकारम् = ____________ (प्रथमा विभक्ति, एकवचनम्, द्वितीया विभक्ति, एकवचनम्)
5. गुहासु ____________ लीनः। (अन्धकारः, दिवाकरः)

**उत्तरम्–**

**I.** 1. हिमालयः 2. अन्धकारम्

**II.** 1. हिमालयः दिवाकरात् अन्धकारम् रक्षति।

2. अन्धकारः गुहासु लीनः।

**III.** 1. गुहायाम्, गुहयोः, 2. दिवाभीतम्+इव, 3. दिवाकरः, 4. द्वितीया विभक्तिः; एकवचनम्, 5. अन्धकारः।